# aShTAvakra gItA

# અષ્ટાવક્રગીતા

## Document Information

Text title : Ashtavakra Gita

File name : ashtgita.itx

Category : gItA, giitaa

Location : doc_giitaa

Author : Vedic tradition

Transliterated by : John Richards jhr at universalist.worldonline.co.uk

Proofread by : John Richards, Raj Acharya kingteacher at hotmail, Rajani Arjun Shankar

Latest update : October 6, 2005, October 22, 2021

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 5, 2024

*sanskritdocuments.org*

# aShTAvakra gItA

# અષ્ટાવક્રગીતા

॥ શ્રી ॥

અથ શ્રીમદષ્ટાવક્રગીતા પ્રારભ્યતે ॥

## ૧

જનક ઉવાચ ॥

કથં જ્ઞાનમવાપ્નોતિ કથં મુક્તિર્ભવિષ્યતિ ।
વૈરાગ્યં ચ કથં પ્રાપ્તમેતદ્ બ્રૂહિ મમ પ્રભો ॥ ૧-૧॥

અષ્ટાવક્ર ઉવાચ ॥

મુક્તિમિચ્છસિ ચેત્તાત વિષયાન્ વિષવત્ત્યજ ।
ક્ષમાર્જવદયાતોષસત્યં પીયૂષવદ્ ભજ ॥ ૧-૨॥

ન પૃથ્વી ન જલં નાગ્નિર્ન વાયુર્દ્યૌર્ન વા ભવાન્ ।
એષાં સાક્ષિણમાત્માનં ચિદ્રૂપં વિદ્ધિ મુક્તયે ॥ ૧-૩॥

યદિ દેહં પૃથક્ કૃત્ય ચિતિ વિશ્રામ્ય તિષ્ઠસિ ।
અધુનૈવ સુખી શાન્તો બન્ધમુક્તો ભવિષ્યસિ ॥ ૧-૪॥

ન ત્વં વિપ્રાદિકો વર્ણો નાશ્રમી નાક્ષગોચરઃ ।
અસઙ્ગોઽસિ નિરાકારો વિશ્વસાક્ષી સુખી ભવ ॥ ૧-૫॥

ધર્માધર્મૌ સુખં દુઃખં માનસાનિ ન તે વિભો ।
ન કર્તાસિ ન ભોક્તાસિ મુક્ત એવાસિ સર્વદા ॥ ૧-૬॥

એકો દ્રષ્ટાસિ સર્વસ્ય મુક્તપ્રાયોઽસિ સર્વદા ।
અયમેવ હિ તે બન્ધો દ્રષ્ટારં પશ્યસીતરમ્ ॥ ૧-૭॥

અહં કર્તેત્યહંમાનમહાકૃષ્ણાહિદંશિતઃ ।

નાહં કર્તેતિ વિશ્વાસામૃતં પીત્વા સુખં ચર ॥ ૧-૮॥

એકો વિશુદ્ધબોધોઽહમિતિ નિશ્ચયવહ્નિના ।
પ્રજ્વાલ્યાજ્ઞાનગહનં વીતશોકઃ સુખી ભવ ॥ ૧-૯॥

યત્ર વિશ્વમિદં ભાતિ કલ્પિતં રજ્જુસર્પવત્ ।
આનન્દપરમાનન્દઃ સ બોધસ્ત્વં સુખં ભવ ॥ ૧-૧૦॥

મુક્તાભિમાની મુક્તો હિ બદ્ધો બદ્ધાભિમાન્યપિ ।
કિંવદન્તીહ સત્યેયં યા મતિઃ સા ગતિર્ભવેત્ ॥ ૧-૧૧॥

આત્મા સાક્ષી વિભુઃ પૂર્ણ એકો મુક્તશ્ચિદક્રિયઃ ।
અસઙ્ગો નિઃસ્પૃહઃ શાન્તો ભ્રમાત્સંસારવાનિવ ॥ ૧-૧૨॥

કૂટસ્થં બોધમદ્વૈતમાત્માનં પરિભાવય ।
આભાસોઽહં ભ્રમં મુક્ત્વા ભાવં બાહ્યમથાન્તરમ્ ॥ ૧-૧૩॥

દેહાભિમાનપાશેન ચિરં બદ્ધોઽસિ પુત્રક ।
બોધોઽહં જ્ઞાનખઙ્ગેન તન્નિકૃત્ય સુખી ભવ ॥ ૧-૧૪॥

નિઃસઙ્ગો નિષ્ક્રિયોઽસિ ત્વં સ્વપ્રકાશો નિરઞ્જનઃ ।
અયમેવ હિ તે બન્ધઃ સમાધિમનુતિષ્ઠસિ ॥ ૧-૧૫॥

ત્વયા વ્યાપ્તમિદં વિશ્વં ત્વયિ પ્રોતં યથાર્થતઃ ।
શુદ્ધબુદ્ધસ્વરૂપસ્ત્વં મા ગમઃ ક્ષુદ્રચિત્તતામ્ ॥ ૧-૧૬॥

નિરપેક્ષો નિર્વિકારો નિર્ભરઃ શીતલાશયઃ ।
અગાધબુદ્ધિરક્ષુબ્ધો ભવ ચિન્માત્રવાસનઃ ॥ ૧-૧૭॥

સાકારમનૃતં વિદ્ધિ નિરાકારં તુ નિશ્ચલમ્ ।
એતત્તત્ત્વોપદેશેન ન પુનર્ભવસમ્ભવઃ ॥ ૧-૧૮॥

યથૈવાદર્શમધ્યસ્થે રૂપેઽન્તઃ પરિતસ્તુ સઃ ।
તથૈવાઽસ્મિન્ શરીરેઽન્તઃ પરિતઃ પરમેશ્વરઃ ॥ ૧-૧૯॥

એકં સર્વગતં વ્યોમ બહિરન્તર્યથા ઘટે ।
નિત્યં નિરન્તરં બ્રહ્મ સર્વભૂતગણે તથા ॥ ૧-૨૦॥

# ૨

જનક ઉવાચ ॥

અહો નિરઞ્જનઃ શાન્તો બોધોઽહં પ્રકૃતેઃ પરઃ ।
એતાવન્તમહં કાલં મોહેનૈવ વિડમ્બિતઃ ॥ ૨-૧॥

યથા પ્રકાશયામ્યેકો દેહમેનં તથા જગત્ ।
અતો મમ જગત્સર્વમથવા ન ચ કિઞ્ચન ॥ ૨-૨॥

સ શરીરમહો વિશ્વં પરિત્યજ્ય મયાધુના ।
કુતશ્ચિત્ કૌશલાદ્ એવ પરમાત્મા વિલોક્યતે ॥ ૨-૩॥

યથા ન તોયતો ભિન્નાસ્તરઙ્ગાઃ ફેનબુદ્બુદાઃ ।
આત્મનો ન તથા ભિન્નં વિશ્વમાત્મવિનિર્ગતમ્ ॥ ૨-૪॥

તન્તુમાત્રો ભવેદ્ એવ પટો યદ્વદ્ વિચારિતઃ ।
આત્મતન્માત્રમેવેદં તદ્વદ્ વિશ્વં વિચારિતમ્ ॥ ૨-૫॥

યથૈવેક્ષુરસે ક્લૃપ્તા તેન વ્યાપ્તૈવ શર્કરા ।
તથા વિશ્વં મયિ ક્લૃપ્તં મયા વ્યાપ્તં નિરન્તરમ્ ॥ ૨-૬॥

આત્માજ્ઞાનાજ્જગદ્ભાતિ આત્મજ્ઞાનાન્ન ભાસતે ।
રજ્જ્વજ્ઞાનાદહિર્ભાતિ તજ્જ્ઞાનાદ્ ભાસતે ન હિ ॥ ૨-૭॥

પ્રકાશો મે નિજં રૂપં નાતિરિક્તોઽસ્મ્યહં તતઃ ।
યદા પ્રકાશતે વિશ્વં તદાહં ભાસ એવ હિ ॥ ૨-૮॥

અહો વિકલ્પિતં વિશ્વમજ્ઞાનાન્મયિ ભાસતે ।
રૂપ્યં શુક્તૌ ફણી રજ્જૌ વારિ સૂર્યકરે યથા ॥ ૨-૯॥

મત્તો વિનિર્ગતં વિશ્વં મય્યેવ લયમેષ્યતિ ।
મૃદિ કુમ્ભો જલે વીચિઃ  કનકે કટકં યથા ॥ ૨-૧૦॥

અહો અહં નમો મહ્યં વિનાશો યસ્ય નાસ્તિ મે ।
બ્રહ્માદિસ્તમ્બપર્યન્તં જગન્નાશોઽપિ તિષ્ઠતઃ ॥ ૨-૧૧॥

અહો અહં નમો મહ્યમેકોઽહં દેહવાનપિ ।
ક્વચિન્ન ગન્તા નાગન્તા વ્યાપ્ય વિશ્વમવસ્થિતઃ ॥ ૨-૧૨॥

અહો અહં નમો મહ્યં દક્ષો નાસ્તીહ મત્સમઃ ।

અસંસ્પૃશ્ય શરીરેણ યેન વિશ્વં ચિરં ધૃતમ્ ॥ ૨-૧૩॥

અહો અહં નમો મહ્યં યસ્ય મે નાસ્તિ કિઞ્ચન ।
અથવા યસ્ય મે સર્વં યદ્ વાઙ્મનસગોચરમ્ ॥ ૨-૧૪॥

જ્ઞાનં જ્ઞેયં તથા જ્ઞાતા ત્રિતયં નાસ્તિ વાસ્તવમ્ ।
અજ્ઞાનાદ્ ભાતિ યત્રેદં સોઽહમસ્મિ નિરઞ્જનઃ ॥ ૨-૧૫॥

દ્વૈતમૂલમહો દુઃખં નાન્યત્તસ્યાઽસ્તિ ભેષજમ્ ।
દૃશ્યમેતન્ મૃષા સર્વમેકોઽહં ચિદ્રસોમલઃ ॥ ૨-૧૬॥

બોધમાત્રોઽહમજ્ઞાનાદ્ ઉપાધિઃ કલ્પિતો મયા ।
એવં વિમૃશતો નિત્યં નિર્વિકલ્પે સ્થિતિર્મમ ॥ ૨-૧૭॥

ન મે બન્ધોઽસ્તિ મોક્ષો વા ભ્રાન્તિઃ શાન્તા નિરાશ્રયા ।
અહો મયિ સ્થિતં વિશ્વં વસ્તુતો ન મયિ સ્થિતમ્ ॥ ૨-૧૮॥

સશરીરમિદં વિશ્વં ન કિઞ્ચિદિતિ નિશ્ચિતમ્ ।
શુદ્ધચિન્માત્ર આત્મા ચ તત્કસ્મિન્ કલ્પનાધુના ॥ ૨-૧૯॥

શરીરં સ્વર્ગનરકૌ બન્ધમોક્ષૌ ભયં તથા ।
કલ્પનામાત્રમેવૈતત્ કિં મે કાર્યં ચિદાત્મનઃ ॥ ૨-૨૦॥

અહો જનસમૂહેઽપિ ન દ્વૈતં પશ્યતો મમ ।
અરણ્યમિવ સંવૃત્તં ક્વ રતિં કરવાણ્યહમ્ ॥ ૨-૨૧॥

નાહં દેહો ન મે દેહો જીવો નાહમહં હિ ચિત્ ।
અયમેવ હિ મે બન્ધ આસીદ્યા જીવિતે સ્પૃહા ॥ ૨-૨૨॥

અહો ભુવનકલ્લોલૈર્વિચિત્રૈર્દ્રાક્ સમુત્થિતમ્ ।
મય્યનન્તમહામ્ભોધૌ ચિત્તવાતે સમુદ્યતે ॥ ૨-૨૩॥

મય્યનન્તમહામ્ભોધૌ ચિત્તવાતે પ્રશામ્યતિ ।
અભાગ્યાજ્જીવવણિજો જગત્પોતો વિનશ્વરઃ ॥ ૨-૨૪॥

મય્યનન્તમહામ્ભોધાવાશ્ચર્યં જીવવીચયઃ ।
ઉદ્યન્તિ ઘ્નન્તિ ખેલન્તિ પ્રવિશન્તિ સ્વભાવતઃ ॥ ૨-૨૫॥

# ૩

અષ્ટાવક્ર ઉવાચ ॥

અવિનાશિનમાત્માનમેકં વિજ્ઞાય તત્ત્વતઃ ।
તવાત્મજ્ઞાનસ્ય ધીરસ્ય કથમર્થાર્જને રતિઃ ॥ ૩-૧॥

આત્માજ્ઞાનાદહો પ્રીતિર્વિષયભ્રમગોચરે ।
શુક્તેરજ્ઞાનતો લોભો યથા રજતવિભ્રમે ॥ ૩-૨॥

વિશ્વં સ્ફુરતિ યત્રેદં તરઙ્ગા ઇવ સાગરે ।
સોઽહમસ્મીતિ વિજ્ઞાય કિં દીન ઇવ ધાવસિ ॥ ૩-૩॥

શ્રુત્વાપિ શુદ્ધચૈતન્ય આત્માનમતિસુન્દરમ્ ।
ઉપસ્થેઽત્યન્તસંસક્તો માલિન્યમધિગચ્છતિ ॥ ૩-૪॥

સર્વભૂતેષુ ચાત્માનં સર્વભૂતાનિ ચાત્મનિ ।
મુનેર્જાનત આશ્ચર્યં મમત્વમનુવર્તતે ॥ ૩-૫॥

આસ્થિતઃ પરમાદ્વૈતં મોક્ષાર્થેઽપિ વ્યવસ્થિતઃ ।
આશ્ચર્યં કામવશગો વિકલઃ કેલિશિક્ષયા ॥ ૩-૬॥

ઉદ્ભૂતં જ્ઞાનદુર્મિત્રમવધાર્યાતિદુર્બલઃ ।
આશ્ચર્યં કામમાકાઙ્ક્ષેત્ કાલમન્તમનુશ્રિતઃ ॥ ૩-૭॥

ઇહામુત્ર વિરક્તસ્ય નિત્યાનિત્યવિવેકિનઃ ।
આશ્ચર્યં મોક્ષકામસ્ય મોક્ષાદ્ એવ વિભીષિકા ॥ ૩-૮॥

ધીરસ્તુ ભોજ્યમાનોઽપિ પીડ્યમાનોઽપિ સર્વદા ।
આત્માનં કેવલં પશ્યન્ ન તુષ્યતિ ન કુપ્યતિ ॥ ૩-૯॥

ચેષ્ટમાનં શરીરં સ્વં પશ્યત્યન્યશરીરવત્ ।
સંસ્તવે ચાપિ નિન્દાયાં કથં ક્ષુભ્યેત્ મહાશયઃ ॥ ૩-૧૦॥

માયામાત્રમિદં વિશ્વં પશ્યન્ વિગતકૌતુકઃ ।
અપિ સન્નિહિતે મૃત્યૌ કથં ત્રસ્યતિ ધીરધીઃ ॥ ૩-૧૧॥

નિઃસ્પૃહં માનસં યસ્ય નૈરાશ્યેઽપિ મહાત્મનઃ ।
તસ્યાત્મજ્ઞાનતૃપ્તસ્ય તુલના કેન જાયતે ॥ ૩-૧૨॥

સ્વભાવાદ્ એવ જાનાનો દૃશ્યમેતન્ન કિઞ્ચન ।

ઇદં ગ્રાહ્યમિદં ત્યાજ્યં સ કિં પશ્યતિ ધીરધીઃ ॥ ૩-૧૩॥

અન્તસ્ત્યક્તકષાયસ્ય નિર્દ્વન્દ્વસ્ય નિરાશિષઃ ।
યદૃચ્છયાગતો ભોગો ન દુઃખાય ન તુષ્ટયે ॥ ૩-૧૪॥

## ૪

જનક ઉવાચ ॥

હન્તાત્મજ્ઞાનસ્ય ધીરસ્ય ખેલતો ભોગલીલયા ।
ન હિ સંસારવાહીકૈર્મૂઢૈઃ સહ સમાનતા ॥ ૪-૧॥

યત્ પદં પ્રેપ્સવો દીનાઃ શક્રાદ્યાઃ સર્વદેવતાઃ ।
અહો તત્ર સ્થિતો યોગી ન હર્ષમુપગચ્છતિ ॥ ૪-૨॥

તજ્જ્ઞસ્ય પુણ્યપાપાભ્યાં સ્પર્શો હ્યન્તર્ન જાયતે ।
ન હ્યાકાશસ્ય ધૂમેન દૃશ્યમાનાપિ સઙ્ગતિઃ ॥ ૪-૩॥

આત્મૈવેદં જગત્સર્વં જ્ઞાતં યેન મહાત્મના ।
યદૃચ્છયા વર્તમાનં તં નિષેદ્ધું ક્ષમેત કઃ ॥ ૪-૪॥

આબ્રહ્મસ્તમ્બપર્યન્તે ભૂતગ્રામે ચતુર્વિધે ।
વિજ્ઞસ્યૈવ હિ સામર્થ્યમિચ્છાનિચ્છાવિવર્જને ॥ ૪-૫॥

આત્માનમદ્વયં કશ્ચિજ્જાનાતિ જગદીશ્વરમ્ ।
યદ્ વેત્તિ તત્સ કુરુતે ન ભયં તસ્ય કુત્રચિત્ ॥ ૪-૬॥

## ૫

અષ્ટાવક્ર ઉવાચ ॥

ન તે સઙ્ગોઽસ્તિ કેનાપિ કિં શુદ્ધસ્ત્યક્તુમિચ્છસિ ।
સઙ્ઘાતવિલયં કુર્વન્નેવમેવ લયં વ્રજ ॥ ૫-૧॥

ઉદેતિ ભવતો વિશ્વં વારિધેરિવ બુદ્બુદઃ ।
ઇતિ જ્ઞાત્વૈકમાત્માનમેવમેવ લયં વ્રજ ॥ ૫-૨॥

પ્રત્યક્ષમપ્યવસ્તુત્વાદ્ વિશ્વં નાસ્ત્યમલે ત્વયિ ।
રજ્જુસર્પ ઇવ વ્યક્તમેવમેવ લયં વ્રજ ॥ ૫-૩॥

સમદુઃખસુખઃ પૂર્ણ આશાનૈરાશ્યયોઃ સમઃ ।
સમજીવિતમૃત્યુઃ સન્નેવમેવ લયં વ્રજ ॥ ૫-૪॥

## ૬

જનક ઉવાચ ॥

આકાશવદનન્તોઽહં ઘટવત્ પ્રાકૃતં જગત્ ।
ઇતિ જ્ઞાનં તથૈતસ્ય ન ત્યાગો ન ગ્રહો લયઃ ॥ ૬-૧॥

મહોદધિરિવાહં સ પ્રપઞ્ચો વીચિસન્નિભઃ ।
ઇતિ જ્ઞાનં તથૈતસ્ય ન ત્યાગો ન ગ્રહો લયઃ ॥ ૬-૨॥

અહં સ શુક્તિસઙ્કાશો રૂપ્યવદ્ વિશ્વકલ્પના ।
ઇતિ જ્ઞાનં તથૈતસ્ય ન ત્યાગો ન ગ્રહો લયઃ ॥ ૬-૩॥

અહં વા સર્વભૂતેષુ સર્વભૂતાન્યથો મયિ ।
ઇતિ જ્ઞાનં તથૈતસ્ય ન ત્યાગો ન ગ્રહો લયઃ ॥ ૬-૪॥

## ૭

જનક ઉવાચ ॥

મય્યનન્તમહામ્ભોધૌ વિશ્વપોત ઇતસ્તતઃ ।
ભ્રમતિ સ્વાન્તવાતેન ન મમાસ્ત્યસહિષ્ણુતા ॥ ૭-૧॥

મય્યનન્તમહામ્ભોધૌ જગદ્વીચિઃ સ્વભાવતઃ ।
ઉદેતુ વાસ્તમાયાતુ ન મે વૃદ્ધિર્ન ચ ક્ષતિઃ ॥ ૭-૨॥

મય્યનન્તમહામ્ભોધૌ વિશ્વં નામ વિકલ્પના ।
અતિશાન્તો નિરાકાર એતદેવાહમાસ્થિતઃ ॥ ૭-૩॥

નાત્મા ભાવેષુ નો ભાવસ્તત્રાનન્તે નિરઞ્જને ।
ઇત્યસક્તોઽસ્પૃહઃ શાન્ત એતદેવાહમાસ્થિતઃ ॥ ૭-૪॥

અહો ચિન્માત્રમેવાહમિન્દ્રજાલોપમં જગત્ ।
ઇતિ મમ કથં કુત્ર હેયોપાદેયકલ્પના ॥ ૭-૫॥

## ૮

અષ્ટાવક્ર ઉવાચ ॥

તદા બન્ધો યદા ચિત્તં કિઞ્ચિદ્ વાઞ્છતિ શોચતિ ।
કિઞ્ચિન્ મુઞ્ચતિ ગૃહ્ણાતિ કિઞ્ચિદ્ધૃષ્યતિ કુપ્યતિ ॥ ૮-૧॥

તદા મુક્તિર્યદા ચિત્તં ન વાઞ્છતિ ન શોચતિ ।
ન મુઞ્ચતિ ન ગૃહ્ણાતિ ન હૃષ્યતિ ન કુપ્યતિ ॥ ૮-૨॥

તદા બન્ધો યદા ચિત્તં સક્તં કાસ્વપિ દૃષ્ટિષુ ।
તદા મોક્ષો યદા ચિત્તમસક્તં સર્વદૃષ્ટિષુ ॥ ૮-૩॥

યદા નાહં તદા મોક્ષો યદાહં બન્ધનં તદા ।
મત્વેતિ હેલયા કિઞ્ચિન્મા ગૃહાણ વિમુઞ્ચ મા ॥ ૮-૪॥

## ૯

અષ્ટાવક્ર ઉવાચ ॥

કૃતાકૃતે ચ દ્વન્દ્વાનિ કદા શાન્તાનિ કસ્ય વા ।
એવં જ્ઞાત્વેહ નિર્વેદાદ્ ભવ ત્યાગપરોઽવ્રતી ॥ ૯-૧॥

કસ્યાપિ તાત ધન્યસ્ય લોકચેષ્ટાવલોકનાત્ ।
જીવિતેચ્છા બુભુક્ષા ચ બુભુત્સોપશમં ગતાઃ ॥ ૯-૨॥

અનિત્યં સર્વમેવેદં તાપત્રિતયદૂષિતમ્ ।
અસારં નિન્દિતં હેયમિતિ નિશ્ચિત્ય શામ્યતિ ॥ ૯-૩॥

કોઽસૌ કાલો વયઃ કિં વા યત્ર દ્વન્દ્વાનિ નો નૃણામ્ ।
તાન્યુપેક્ષ્ય યથાપ્રાપ્તવર્તી સિદ્ધિમવાપ્નુયાત્ ॥ ૯-૪॥

નાના મતં મહર્ષીણાં સાધૂનાં યોગિનાં તથા ।
દૃષ્ટ્વા નિર્વેદમાપન્નઃ કો ન શામ્યતિ માનવઃ ॥ ૯-૫॥

કૃત્વા મૂર્તિપરિજ્ઞાનં ચૈતન્યસ્ય ન કિં ગુરુઃ ।
નિર્વેદસમતાયુક્ત્યા યસ્તારયતિ સંસૃતેઃ ॥ ૯-૬॥

પશ્ય ભૂતવિકારાંસ્ત્વં ભૂતમાત્રાન્ યથાર્થતઃ ।
તત્ક્ષણાદ્ બન્ધનિર્મુક્તઃ સ્વરૂપસ્થો ભવિષ્યસિ ॥ ૯-૭॥

વાસના એવ સંસાર ઇતિ સર્વા વિમુઞ્ચ તાઃ ।
તત્ત્યાગો વાસનાત્યાગાત્સ્થિતિરદ્ય યથા તથા ॥ ૯-૮॥

## ૧૦

અષ્ટાવક્ર ઉવાચ ॥

વિહાય વૈરિણં કામમર્થં ચાનર્થસઙ્કુલમ્ ।
ધર્મમપ્યેતયોર્હેતું સર્વત્રાનાદરં કુરુ ॥ ૧૦-૧॥

સ્વપ્નેન્દ્રજાલવત્ પશ્ય દિનાનિ ત્રીણિ પઞ્ચ વા ।
મિત્રક્ષેત્રધનાગારદારદાયાદિસમ્પદઃ ॥ ૧૦-૨॥

યત્ર યત્ર ભવેત્તૃષ્ણા સંસારં વિદ્ધિ તત્ર વૈ ।
પ્રૌઢવૈરાગ્યમાશ્રિત્ય વીતતૃષ્ણઃ સુખી ભવ ॥ ૧૦-૩॥

તૃષ્ણામાત્રાત્મકો બન્ધસ્તન્નાશો મોક્ષ ઉચ્યતે ।
ભવાસંસક્તિમાત્રેણ પ્રાપ્તિતુષ્ટિર્મુહુર્મુહુઃ ॥ ૧૦-૪॥

ત્વમેકશ્ચેતનઃ શુદ્ધો જડં વિશ્વમસત્તથા ।
અવિદ્યાપિ ન કિઞ્ચિત્સા કા બુભુત્સા તથાપિ તે ॥ ૧૦-૫॥

રાજ્યં સુતાઃ કલત્રાણિ શરીરાણિ સુખાનિ ચ ।
સંસક્તસ્યાપિ નષ્ટાનિ તવ જન્મનિ જન્મનિ ॥ ૧૦-૬॥

અલમર્થેન કામેન સુકૃતેનાપિ કર્મણા ।
એભ્યઃ સંસારકાન્તારે ન વિશ્રાન્તમભૂન્ મનઃ ॥ ૧૦-૭॥

કૃતં ન કતિ જન્માનિ કાયેન મનસા ગિરા ।
દુઃખમાયાસદં કર્મ તદદ્યાપ્યુપરમ્યતામ્ ॥ ૧૦-૮॥

## ૧૧

અષ્ટાવક્ર ઉવાચ ॥

ભાવાભાવવિકારશ્ચ સ્વભાવાદિતિ નિશ્ચયી ।
નિર્વિકારો ગતક્લેશઃ સુખેનૈવોપશામ્યતિ ॥ ૧૧-૧॥

ઈશ્વરઃ સર્વનિર્માતા નેહાન્ય ઇતિ નિશ્ચયી ।

અન્તર્ગલિતસર્વાશઃ શાન્તઃ ક્વાપિ ન સજ્જતે ॥ ૧૧-૨॥

આપદઃ સમ્પદઃ કાલે દૈવાદેવેતિ નિશ્ચયી ।
તૃપ્તઃ સ્વસ્થેન્દ્રિયો નિત્યં ન વાઞ્છતિ ન શોચતિ ॥ ૧૧-૩॥

સુખદુઃખે જન્મમૃત્યૂ દૈવાદેવેતિ નિશ્ચયી ।
સાધ્યાદર્શી નિરાયાસઃ કુર્વન્નપિ ન લિપ્યતે ॥ ૧૧-૪॥

ચિન્તયા જાયતે દુઃખં નાન્યથેહેતિ નિશ્ચયી ।
તયા હીનઃ સુખી શાન્તઃ સર્વત્ર ગલિતસ્પૃહઃ ॥ ૧૧-૫॥

નાહં દેહો ન મે દેહો બોધોઽહમિતિ નિશ્ચયી ।
કૈવલ્યમિવ સમ્પ્રાપ્તો ન સ્મરત્યકૃતં કૃતમ્ ॥ ૧૧-૬॥

આબ્રહ્મસ્તમ્બપર્યન્તમહમેવેતિ નિશ્ચયી ।
નિર્વિકલ્પઃ શુચિઃ શાન્તઃ પ્રાપ્તાપ્રાપ્તવિનિર્વૃતઃ ॥ ૧૧-૭॥

નાનાશ્ચર્યમિદં વિશ્વં ન કિઞ્ચિદિતિ નિશ્ચયી ।
નિર્વાસનઃ સ્ફૂર્તિમાત્રો ન કિઞ્ચિદિવ શામ્યતિ ॥ ૧૧-૮॥

## ૧૨

જનક ઉવાચ ॥

કાયકૃત્યાસહઃ પૂર્વં તતો વાગ્વિસ્તરાસહઃ ।
અથ ચિન્તાસહસ્તસ્માદ્ એવમેવાહમાસ્થિતઃ ॥ ૧૨-૧॥

પ્રીત્યભાવેન શબ્દાદેરદૃશ્યત્વેન ચાત્મનઃ ।
વિક્ષેપૈકાગ્રહૃદય એવમેવાહમાસ્થિતઃ ॥ ૧૨-૨॥

સમાધ્યાસાદિવિક્ષિપ્તૌ વ્યવહારઃ સમાધયે ।
એવં વિલોક્ય નિયમમેવમેવાહમાસ્થિતઃ ॥ ૧૨-૩॥

હેયોપાદેયવિરહાદ્ એવં હર્ષવિષાદયોઃ ।
અભાવાદદ્ય હે બ્રહ્મન્ એવમેવાહમાસ્થિતઃ ॥ ૧૨-૪॥

આશ્રમાનાશ્રમં ધ્યાનં ચિત્તસ્વીકૃતવર્જનમ્ ।
વિકલ્પં મમ વીક્ષ્યૈતૈરેવમેવાહમાસ્થિતઃ ॥ ૧૨-૫॥

કર્માનુષ્ઠાનમજ્ઞાનાદ્ યથૈવોપરમસ્તથા ।

બુધ્વા સમ્યગિદં તત્ત્વમેવમેવાહમાસ્થિતઃ ॥ ૧૨-૬॥

અચિન્ત્યં ચિન્ત્યમાનોઽપિ ચિન્તારૂપં ભજત્યસૌ ।
ત્યક્ત્વા તદ્ભાવનં તસ્માદ્ એવમેવાહમાસ્થિતઃ ॥ ૧૨-૭॥

એવમેવ કૃતં યેન સ કૃતાર્થો ભવેદસૌ ।
એવમેવ સ્વભાવો યઃ સ કૃતાર્થો ભવેદસૌ ॥ ૧૨-૮॥

## ૧૩

જનક ઉવાચ ॥

અકિઞ્ચનભવં સ્વાસ્થ્યં કૌપીનત્વેઽપિ દુર્લભમ્ ।
ત્યાગાદાને વિહાયાસ્માદહમાસે યથાસુખમ્ ॥ ૧૩-૧॥

કુત્રાપિ ખેદઃ કાયસ્ય જિહ્વા કુત્રાપિ ખિદ્યતે ।
મનઃ કુત્રાપિ તત્ત્યક્ત્વા પુરુષાર્થે સ્થિતઃ સુખમ્ ॥ ૧૩-૨॥

કૃતં કિમપિ નૈવ સ્યાદ્ ઇતિ સઞ્ચિન્ત્ય તત્ત્વતઃ ।
યદા યત્કર્તુમાયાતિ તત્ કૃત્વાસે યથાસુખમ્ ॥ ૧૩-૩॥

કર્મનૈષ્કર્મ્યનિર્બન્ધભાવા દેહસ્થયોગિનઃ ।
સંયોગાયોગવિરહાદહમાસે યથાસુખમ્ ॥ ૧૩-૪॥

અર્થાનર્થૌ ન મે સ્થિત્યા ગત્યા ન શયનેન વા ।
તિષ્ઠન્ ગચ્છન્ સ્વપન્ તસ્માદહમાસે યથાસુખમ્ ॥ ૧૩-૫॥

સ્વપતો નાસ્તિ મે હાનિઃ સિદ્ધિર્યત્નવતો ન વા ।
નાશોલ્લાસૌ વિહાયાસ્માદહમાસે યથાસુખમ્ ॥ ૧૩-૬॥

સુખાદિરૂપા નિયમં ભાવેષ્વાલોક્ય ભૂરિશઃ ।
શુભાશુભે વિહાયાસ્માદહમાસે યથાસુખમ્ ॥ ૧૩-૭॥

## ૧૪

જનક ઉવાચ ॥

પ્રકૃત્યા શૂન્યચિત્તો યઃ પ્રમાદાદ્ ભાવભાવનઃ ।
નિદ્રિતો બોધિત ઇવ ક્ષીણસંસ્મરણો હિ સઃ ॥ ૧૪-૧॥

ક્વ ધનાનિ ક્વ મિત્રાણિ ક્વ મે વિષયદસ્યવઃ ।
ક્વ શાસ્ત્રં ક્વ ચ વિજ્ઞાનં યદા મે ગલિતા સ્પૃહા ॥ ૧૪-૨॥

વિજ્ઞાતે સાક્ષિપુરુષે પરમાત્મનિ ચેશ્વરે ।
નૈરાશ્યે બન્ધમોક્ષે ચ ન ચિન્તા મુક્તયે મમ ॥ ૧૪-૩॥

અન્તર્વિકલ્પશૂન્યસ્ય બહિઃ સ્વચ્છન્દચારિણઃ ।
ભ્રાન્તસ્યેવ દશાસ્તાસ્તાસ્તાદૃશા એવ જાનતે ॥ ૧૪-૪॥

## ૧૫

અષ્ટાવક્ર ઉવાચ ॥

યથાતથોપદેશેન કૃતાર્થઃ સત્ત્વબુદ્ધિમાન્ ।
આજીવમપિ જિજ્ઞાસુઃ પરસ્તત્ર વિમુહ્યતિ ॥ ૧૫-૧॥

મોક્ષો વિષયવૈરસ્યં બન્ધો વૈષયિકો રસઃ ।
એતાવદેવ વિજ્ઞાનં યથેચ્છસિ તથા કુરુ ॥ ૧૫-૨॥

વાગ્મિપ્રાજ્ઞામહોદ્યોગં જનં મૂકજડાલસમ્ ।
કરોતિ તત્ત્વબોધોઽયમતસ્ત્યક્તો બુભુક્ષભિઃ ॥ ૧૫-૩॥

ન ત્વં દેહો ન તે દેહો ભોક્તા કર્તા ન વા ભવાન્ ।
ચિદ્રૂપોઽસિ સદા સાક્ષી નિરપેક્ષઃ સુખં ચર ॥ ૧૫-૪॥

રાગદ્વેષૌ મનોધર્મૌ ન મનસ્તે કદાચન ।
નિર્વિકલ્પોઽસિ બોધાત્મા નિર્વિકારઃ સુખં ચર ॥ ૧૫-૫॥

સર્વભૂતેષુ ચાત્માનં સર્વભૂતાનિ ચાત્મનિ ।
વિજ્ઞાય નિરહઙ્કારો નિર્મમસ્ત્વં સુખી ભવ ॥ ૧૫-૬॥

વિશ્વં સ્ફુરતિ યત્રેદં તરઙ્ગા ઇવ સાગરે ।
તત્ત્વમેવ ન સન્દેહશ્ચિન્મૂર્તે વિજ્વરો ભવ ॥ ૧૫-૭॥

શ્રદ્ધસ્વ તાત શ્રદ્ધસ્વ નાત્ર મોહં કુરુષ્વ ભોઃ ।
જ્ઞાનસ્વરૂપો ભગવાનાત્મા ત્વં પ્રકૃતેઃ પરઃ ॥ ૧૫-૮॥

ગુણૈઃ સંવેષ્ટિતો દેહસ્તિષ્ઠત્યાયાતિ યાતિ ચ ।
આત્મા ન ગન્તા નાગન્તા કિમેનમનુશોચસિ ॥ ૧૫-૯॥

દેહસ્તિષ્ઠતુ કલ્પાન્તં ગચ્છત્વદ્યૈવ વા પુનઃ ।
ક્વ વૃદ્ધિઃ ક્વ ચ વા હાનિસ્તવ ચિન્માત્રરૂપિણઃ ॥ ૧૫-૧૦ ॥

ત્વય્યનન્તમહામ્ભોધૌ વિશ્વવીચિઃ સ્વભાવતઃ ।
ઉદેતુ વાસ્તમાયાતુ ન તે વૃદ્ધિર્ન વા ક્ષતિઃ ॥ ૧૫-૧૧ ॥

તાત ચિન્માત્રરૂપોઽસિ ન તે ભિન્નમિદં જગત્ ।
અતઃ કસ્ય કથં કુત્ર હેયોપાદેયકલ્પના ॥ ૧૫-૧૨ ॥

એકસ્મિન્નવ્યયે શાન્તે ચિદાકાશેઽમલે ત્વયિ ।
કુતો જન્મ કુતો કર્મ કુતોઽહઙ્કાર એવ ચ ॥ ૧૫-૧૩ ॥

યત્ત્વં પશ્યસિ તત્રૈકસ્ત્વમેવ પ્રતિભાસસે ।
કિં પૃથક્ ભાસતે સ્વર્ણાત્ કટકાઙ્ગદનૂપુરમ્ ॥ ૧૫-૧૪ ॥

અયં સોઽહમયં નાહં વિભાગમિતિ સન્ત્યજ ।
સર્વમાત્મેતિ નિશ્ચિત્ય નિઃસઙ્કલ્પઃ સુખી ભવ ॥ ૧૫-૧૫ ॥

તવૈવાજ્ઞાનતો વિશ્વં ત્વમેકઃ પરમાર્થતઃ ।
ત્વત્તોઽન્યો નાસ્તિ સંસારી નાસંસારી ચ કશ્ચન ॥ ૧૫-૧૬ ॥

ભ્રાન્તિમાત્રમિદં વિશ્વં ન કિઞ્ચિદિતિ નિશ્ચયી ।
નિર્વાસનઃ સ્ફૂર્તિમાત્રો ન કિઞ્ચિદિવ શામ્યતિ ॥ ૧૫-૧૭ ॥

એક એવ ભવામ્ભોધાવાસીદસ્તિ ભવિષ્યતિ ।
ન તે બન્ધોઽસ્તિ મોક્ષો વા કૃતકૃત્યઃ સુખં ચર ॥ ૧૫-૧૮ ॥

મા સઙ્કલ્પવિકલ્પાભ્યાં ચિત્તં ક્ષોભય ચિન્મય ।
ઉપશામ્ય સુખં તિષ્ઠ સ્વાત્મન્યાનન્દવિગ્રહે ॥ ૧૫-૧૯ ॥

ત્યજૈવ ધ્યાનં સર્વત્ર મા કિઞ્ચિદ્ હૃદિ ધારય ।
આત્મા ત્વં મુક્ત એવાસિ કિં વિમૃશ્ય કરિષ્યસિ ॥ ૧૫-૨૦ ॥

## ૧૬

અષ્ટાવક્ર ઉવાચ ॥

આચક્ષ્વ શ◌ૃણુ વા તાત નાનાશાસ્ત્રાણ્યનેકશઃ ।
તથાપિ ન તવ સ્વાસ્થ્યં સર્વવિસ્મરણાદ્ ઋતે ॥ ૧૬-૧ ॥

ભોગં કર્મ સમાધિં વા કુરુ વિજ્ઞ તથાપિ તે ।
ચિત્તં નિરસ્તસર્વાશમત્યર્થં રોચયિષ્યતિ ॥ ૧૬-૨॥

આયાસાત્સકલો દુઃખી નૈનં જાનાતિ કશ્ચન ।
અનેનૈવોપદેશેન ધન્યઃ પ્રાપ્નોતિ નિર્વૃતિમ્ ॥ ૧૬-૩॥

વ્યાપારે ખિદ્યતે યસ્તુ નિમેષોન્મેષયોરપિ ।
તસ્યાલસ્ય ધુરીણસ્ય સુખં નાન્યસ્ય કસ્યચિત્ ॥ ૧૬-૪॥

ઇદં કૃતમિદં નેતિ દ્વન્દ્વૈર્મુક્તં યદા મનઃ ।
ધર્માર્થકામમોક્ષેષુ નિરપેક્ષં તદા ભવેત્ ॥ ૧૬-૫॥

વિરક્તો વિષયદ્વેષ્ટા રાગી વિષયલોલુપઃ ।
ગ્રહમોક્ષવિહીનસ્તુ ન વિરક્તો ન રાગવાન્ ॥ ૧૬-૬॥

હેયોપાદેયતા તાવત્સંસારવિટપાઙ્કુરઃ ।
સ્પૃહા જીવતિ યાવદ્ વૈ નિર્વિચારદશાસ્પદમ્ ॥ ૧૬-૭॥

પ્રવૃત્તૌ જાયતે રાગો નિર્વૃત્તૌ દ્વેષ એવ હિ ।
નિર્દ્વન્દ્વો બાલવદ્ ધીમાન્ એવમેવ વ્યવસ્થિતઃ ॥ ૧૬-૮॥

હાતુમિચ્છતિ સંસારં રાગી દુઃખજિહાસયા ।
વીતરાગો હિ નિર્દુઃખસ્તસ્મિન્નપિ ન ખિદ્યતિ ॥ ૧૬-૯॥

યસ્યાભિમાનો મોક્ષેઽપિ દેહેઽપિ મમતા તથા ।
ન ચ જ્ઞાની ન વા યોગી કેવલં દુઃખભાગસૌ ॥ ૧૬-૧૦॥

હરો યદ્યુપદેષ્ટા તે હરિઃ કમલજોઽપિ વા ।
તથાપિ ન તવ સ્વાથ્યં સર્વવિસ્મરણાદૃતે ॥ ૧૬-૧૧॥

## ૧૭

અષ્ટાવક્ર ઉવાચ ॥

તેન જ્ઞાનફલં પ્રાપ્તં યોગાભ્યાસફલં તથા ।
તૃપ્તઃ સ્વચ્છેન્દ્રિયો નિત્યમેકાકી રમતે તુ યઃ ॥ ૧૭-૧॥

ન કદાચિજ્જગત્યસ્મિન્ તત્ત્વજ્ઞો હન્ત ખિદ્યતિ ।
યત એકેન તેનેદં પૂર્ણં બ્રહ્માણ્ડમણ્ડલમ્ ॥ ૧૭-૨॥

ન જાતુ વિષયાઃ કેઽપિ સ્વારામં હર્ષયન્ત્યમી ।
સલ્લકીપલ્લવપ્રીતમિવેભં નિમ્બપલ્લવાઃ ॥ ૧૭-૩ ॥

યસ્તુ ભોગેષુ ભુક્તેષુ ન ભવત્યધિવાસિતઃ ।
અભુક્તેષુ નિરાકાઙ્ક્ષી તાદૃશો ભવદુર્લભઃ ॥ ૧૭-૪ ॥

બુભુક્ષુરિહ સંસારે મુમુક્ષુરપિ દૃશ્યતે ।
ભોગમોક્ષનિરાકાઙ્ક્ષી વિરલો હિ મહાશયઃ ॥ ૧૭-૫ ॥

ધર્માર્થકામમોક્ષેષુ જીવિતે મરણે તથા ।
કસ્યાપ્યુદારચિત્તસ્ય હેયોપાદેયતા ન હિ ॥ ૧૭-૬ ॥

વાઞ્છા ન વિશ્વવિલયે ન દ્વેષસ્તસ્ય ચ સ્થિતૌ ।
યથા જીવિકયા તસ્માદ્ ધન્ય આસ્તે યથા સુખમ્ ॥ ૧૭-૭ ॥

કૃતાર્થોઽનેન જ્ઞાનેનેત્યેવં ગલિતધીઃ કૃતી ।
પશ્યન્ શ ૃણ્વન્ સ્પૃશન્ જિઘ્રન્
અશ્નન્નાસ્તે યથા સુખમ્ ॥ ૧૭-૮ ॥

શૂન્યા દૃષ્ટિર્વૃથા ચેષ્ટા વિકલાનીન્દ્રિયાણિ ચ ।
ન સ્પૃહા ન વિરક્તિર્વા ક્ષીણસંસારસાગરે ॥ ૧૭-૯ ॥

ન જાગર્તિ ન નિદ્રાતિ નોન્મીલતિ ન મીલતિ ।
અહો પરદશા ક્વાપિ વર્તતે મુક્તચેતસઃ ॥ ૧૭-૧૦ ॥

સર્વત્ર દૃશ્યતે સ્વસ્થઃ સર્વત્ર વિમલાશયઃ ।
સમસ્તવાસના મુક્તો મુક્તઃ સર્વત્ર રાજતે ॥ ૧૭-૧૧ ॥

પશ્યન્ શ ૃણ્વન્ સ્પૃશન્ જિઘ્રન્ અશ્નન્
ગૃહ્ણન્ વદન્ વ્રજન્ ।
ઈહિતાનીહિતૈર્મુક્તો મુક્ત એવ મહાશયઃ ॥ ૧૭-૧૨ ॥

ન નિન્દતિ ન ચ સ્તૌતિ ન હૃષ્યતિ ન કુપ્યતિ ।
ન દદાતિ ન ગૃહ્ણાતિ મુક્તઃ સર્વત્ર નીરસઃ ॥ ૧૭-૧૩ ॥

સાનુરાગાં સ્ત્રિયં દૃષ્ટ્વા મૃત્યું વા સમુપસ્થિતમ્ ।
અવિહ્વલમનાઃ સ્વસ્થો મુક્ત એવ મહાશયઃ ॥ ૧૭-૧૪ ॥

સુખે દુઃખે નરે નાર્યાં સમ્પત્સુ ચ વિપત્સુ ચ ।
વિશેષો નૈવ ધીરસ્ય સર્વત્ર સમદર્શિનઃ ॥ ૧૭-૧૫ ॥

ન હિંસા નૈવ કારુણ્યં નૌદ્ધત્યં ન ચ દીનતા ।
નાશ્ચર્યં નૈવ ચ ક્ષોભઃ ક્ષીણસંસરણે નરે ॥ ૧૭-૧૬॥

ન મુક્તો વિષયદ્વેષ્ટા ન વા વિષયલોલુપઃ ।
અસંસક્તમના નિત્યં પ્રાપ્તાપ્રાપ્તમુપાશ્નુતે ॥ ૧૭-૧૭॥

સમાધાનાસમાધાનહિતાહિતવિકલ્પનાઃ ।
શૂન્યચિત્તો ન જાનાતિ કૈવલ્યમિવ સંસ્થિતઃ ॥ ૧૭-૧૮॥

નિર્મમો નિરહઙ્કારો ન કિઞ્ચિદિતિ નિશ્ચિતઃ ।
અન્તર્ગલિતસર્વાશઃ કુર્વન્નપિ કરોતિ ન ॥ ૧૭-૧૯॥

મનઃપ્રકાશસંમોહસ્વપ્નજાડ્યવિવર્જિતઃ ।
દશાં કામપિ સમ્પ્રાપ્તો ભવેદ્ ગલિતમાનસઃ ॥ ૧૭-૨૦॥

## ૧૮

અષ્ટાવક્ર ઉવાચ ॥

યસ્ય બોધોદયે તાવત્સ્વપ્નવદ્ ભવતિ ભ્રમઃ ।
તસ્મૈ સુખૈકરૂપાય નમઃ શાન્તાય તેજસે ॥ ૧૮-૧॥

અર્જયિત્વાખિલાન્ અર્થાન્ ભોગાનાપ્નોતિ પુષ્કલાન્ ।
ન હિ સર્વપરિત્યાગમન્તરેણ સુખી ભવેત્ ॥ ૧૮-૨॥

કર્તવ્યદુઃખમાર્તણ્ડજ્વાલાદગ્ધાન્તરાત્મનઃ ।
કુતઃ પ્રશમપીયૂષધારાસારમૃતે સુખમ્ ॥ ૧૮-૩॥

ભવોઽયં ભાવનામાત્રો ન કિઞ્ચિત્ પરમાર્થતઃ ।
નાસ્ત્યભાવઃ સ્વભાવાનાં ભાવાભાવવિભાવિનામ્ ॥ ૧૮-૪॥

ન દૂરં ન ચ સઙ્કોચાલ્લબ્ધમેવાત્મનઃ પદમ્ ।
નિર્વિકલ્પં નિરાયાસં નિર્વિકારં નિરઞ્જનમ્ ॥ ૧૮-૫॥

વ્યામોહમાત્રવિરતૌ સ્વરૂપાદાનમાત્રતઃ ।
વીતશોકા વિરાજન્તે નિરાવરણદૃષ્ટયઃ ॥ ૧૮-૬॥

સમસ્તં કલ્પનામાત્રમાત્મા મુક્તઃ સનાતનઃ ।
ઇતિ વિજ્ઞાય ધીરો હિ કિમભ્યસ્યતિ બાલવત્ ॥ ૧૮-૭॥

આત્મા બ્રહ્મેતિ નિશ્ચિત્ય ભાવાભાવૌ ચ કલ્પિતૌ ।
નિષ્કામઃ કિં વિજાનાતિ કિં બ્રૂતે ચ કરોતિ કિમ્ ॥ ૧૮-૮॥

અયં સોઽહમયં નાહમિતિ ક્ષીણા વિકલ્પના ।
સર્વમાત્મેતિ નિશ્ચિત્ય તૂષ્ણીમ્ભૂતસ્ય યોગિનઃ ॥ ૧૮-૯॥

ન વિક્ષેપો ન ચૈકાગ્ર્યં નાતિબોધો ન મૂઢતા ।
ન સુખં ન ચ વા દુઃખમુપશાન્તસ્ય યોગિનઃ ॥ ૧૮-૧૦॥

સ્વારાજ્યે ભૈક્ષવૃત્તૌ ચ લાભાલાભે જને વને ।
નિર્વિકલ્પસ્વભાવસ્ય ન વિશેષોઽસ્તિ યોગિનઃ ॥ ૧૮-૧૧॥

ક્વ ધર્મઃ ક્વ ચ વા કામઃ ક્વ ચાર્થઃ ક્વ વિવેકિતા ।
ઇદં કૃતમિદં નેતિ દ્વન્દ્વૈર્મુક્તસ્ય યોગિનઃ ॥ ૧૮-૧૨॥

કૃત્યં કિમપિ નૈવાસ્તિ ન કાપિ હૃદિ રઞ્જના ।
યથા જીવનમેવેહ જીવન્મુક્તસ્ય યોગિનઃ ॥ ૧૮-૧૩॥

ક્વ મોહઃ ક્વ ચ વા વિશ્વં ક્વ તદ્ ધ્યાનં ક્વ મુક્તતા ।
સર્વસઙ્કલ્પસીમાયાં વિશ્રાન્તસ્ય મહાત્મનઃ ॥ ૧૮-૧૪॥

યેન વિશ્વમિદં દૃષ્ટં સ નાસ્તીતિ કરોતુ વૈ ।
નિર્વાસનઃ કિં કુરુતે પશ્યન્નપિ ન પશ્યતિ ॥ ૧૮-૧૫॥

યેન દૃષ્ટં પરં બ્રહ્મ સોઽહં બ્રહ્મેતિ ચિન્તયેત્ ।
કિં ચિન્તયતિ નિશ્ચિન્તો દ્વિતીયં યો ન પશ્યતિ ॥ ૧૮-૧૬॥

દૃષ્ટો યેનાત્મવિક્ષેપો નિરોધં કુરુતે ત્વસૌ ।
ઉદારસ્તુ ન વિક્ષિપ્તઃ સાધ્યાભાવાત્કરોતિ કિમ્ ॥ ૧૮-૧૭॥

ધીરો લોકવિપર્યસ્તો વર્તમાનોઽપિ લોકવત્ ।
ન સમાધિં ન વિક્ષેપં ન લોપં સ્વસ્ય પશ્યતિ ॥ ૧૮-૧૮॥

ભાવાભાવવિહીનો યસ્તૃપ્તો નિર્વાસનો બુધઃ ।
નૈવ કિઞ્ચિત્કૃતં તેન લોકદૃષ્ટ્યા વિકુર્વતા ॥ ૧૮-૧૯॥

પ્રવૃત્તૌ વા નિવૃત્તૌ વા નૈવ ધીરસ્ય દુર્ગ્રહઃ ।
યદા યત્કર્તુમાયાતિ તત્કૃત્વા તિષ્ઠતઃ સુખમ્ ॥ ૧૮-૨૦॥

નિર્વાસનો નિરાલમ્બઃ સ્વચ્છન્દો મુક્તબન્ધનઃ ।
ક્ષિપ્તઃ સંસ્કારવાતેન ચેષ્ટતે શુષ્કપર્ણવત્ ॥ ૧૮-૨૧॥

અસંસારસ્ય તુ ક્વાપિ ન હર્ષો ન વિષાદતા ।
સ શીતલમના નિત્યં વિદેહ ઇવ રાજયે ॥ ૧૮-૨૨॥

કુત્રાપિ ન જિહાસાસ્તિ નાશો વાપિ ન કુત્રચિત્ ।
આત્મારામસ્ય ધીરસ્ય શીતલાચ્છતરાત્મનઃ ॥ ૧૮-૨૩॥

પ્રકૃત્યા શૂન્યચિત્તસ્ય કુર્વતોઽસ્ય યદૃચ્છયા ।
પ્રાકૃતસ્યેવ ધીરસ્ય ન માનો નાવમાનતા ॥ ૧૮-૨૪॥

કૃતં દેહેન કર્મેદં ન મયા શુદ્ધરૂપિણા ।
ઇતિ ચિન્તાનુરોધી યઃ કુર્વન્નપિ કરોતિ ન ॥ ૧૮-૨૫॥

અતદ્વાદીવ કુરુતે ન ભવેદપિ બાલિશઃ ।
જીવન્મુક્તઃ સુખી શ્રીમાન્ સંસરન્નપિ શોભતે ॥ ૧૮-૨૬॥

નાનાવિચારસુશ્રાન્તો ધીરો વિશ્રાન્તિમાગતઃ ।
ન કલ્પતે ન જાનાતિ ન શ‌ૃણોતિ ન પશ્યતિ ॥ ૧૮-૨૭॥

અસમાધેરવિક્ષેપાન્ ન મુમુક્ષુર્ન ચેતરઃ ।
નિશ્ચિત્ય કલ્પિતં પશ્યન્ બ્રહ્મૈવાસ્તે મહાશયઃ ॥ ૧૮-૨૮॥

યસ્યાન્તઃ સ્યાદહઙ્કારો ન કરોતિ કરોતિ સઃ ।
નિરહઙ્કારધીરેણ ન કિઞ્ચિદકૃતં કૃતમ્ ॥ ૧૮-૨૯॥

નોદ્વિગ્નં ન ચ સન્તુષ્ટમકર્તૃ સ્પન્દવર્જિતમ્ ।
નિરાશં ગતસન્દેહં ચિત્તં મુક્તસ્ય રાજતે ॥ ૧૮-૩૦॥

નિર્ધ્યાતું ચેષ્ટિતું વાપિ યચ્ચિત્તં ન પ્રવર્તતે ।
નિર્નિમિત્તમિદં કિન્તુ નિર્ધ્યાયેતિ વિચેષ્ટતે ॥ ૧૮-૩૧॥

તત્ત્વં યથાર્થમાકર્ણ્ય મન્દઃ પ્રાપ્નોતિ મૂઢતામ્ ।
અથવા યાતિ સઙ્કોચમમૂઢઃ કોઽપિ મૂઢવત્ ॥ ૧૮-૩૨॥

એકાગ્રતા નિરોધો વા મૂઢૈરભ્યસ્યતે ભૃશમ્ ।
ધીરાઃ કૃત્યં ન પશ્યન્તિ સુપ્તવત્સ્વપદે સ્થિતાઃ ॥ ૧૮-૩૩॥

અપ્રયત્નાત્ પ્રયત્નાદ્ વા મૂઢો નાપ્નોતિ નિર્વૃતિમ્ ।
તત્ત્વનિશ્ચયમાત્રેણ પ્રાજ્ઞો ભવતિ નિર્વૃતઃ ॥ ૧૮-૩૪॥

શુદ્ધં બુદ્ધં પ્રિયં પૂર્ણં નિષ્પ્રપઞ્ચં નિરામયમ્ ।

આત્માનં તં ન જાનન્તિ તત્રાભ્યાસપરા જનાઃ ॥ ૧૮-૩૫॥

નાપ્નોતિ કર્મણા મોક્ષં વિમૂઢોઽભ્યાસરૂપિણા ।
ધન્યો વિજ્ઞાનમાત્રેણ મુક્તસ્તિષ્ઠત્યવિક્રિયઃ ॥ ૧૮-૩૬॥

મૂઢો નાપ્નોતિ તદ્ બ્રહ્મ યતો ભવિતુમિચ્છતિ ।
અનિચ્છન્નપિ ધીરો હિ પરબ્રહ્મસ્વરૂપભાક્ ॥ ૧૮-૩૭॥

નિરાધારા ગ્રહવ્યગ્રા મૂઢાઃ સંસારપોષકાઃ ।
એતસ્યાનર્થમૂલસ્ય મૂલચ્છેદઃ કૃતો બુધૈઃ ॥ ૧૮-૩૮॥

ન શાન્તિં લભતે મૂઢો યતઃ શમિતુમિચ્છતિ ।
ધીરસ્તત્ત્વં વિનિશ્ચિત્ય સર્વદા શાન્તમાનસઃ ॥ ૧૮-૩૯॥

ક્વાત્મનો દર્શનં તસ્ય યદ્ દૃષ્ટમવલમ્બતે ।
ધીરાસ્તં તં ન પશ્યન્તિ પશ્યન્ત્યાત્માનમવ્યયમ્ ॥ ૧૮-૪૦॥

ક્વ નિરોધો વિમૂઢસ્ય યો નિર્બન્ધં કરોતિ વૈ ।
સ્વારામસ્યૈવ ધીરસ્ય સર્વદાસાવકૃત્રિમઃ ॥ ૧૮-૪૧॥

ભાવસ્ય ભાવકઃ કશ્ચિન્ ન કિઞ્ચિદ્ ભાવકોપરઃ ।
ઉભયાભાવકઃ કશ્ચિદ્ એવમેવ નિરાકુલઃ ॥ ૧૮-૪૨॥

શુદ્ધમદ્વયમાત્માનં ભાવયન્તિ કુબુદ્ધયઃ ।
ન તુ જાનન્તિ સંમોહાદ્યાવજ્જીવમનિર્વૃતાઃ ॥ ૧૮-૪૩॥

મુમુક્ષોર્બુદ્ધિરાલમ્બમન્તરેણ ન વિદ્યતે ।
નિરાલમ્બૈવ નિષ્કામા બુદ્ધિર્મુક્તસ્ય સર્વદા ॥ ૧૮-૪૪॥

વિષયદ્વીપિનો વીક્ષ્ય ચકિતાઃ શરણાર્થિનઃ ।
વિશન્તિ ઝટિતિ ક્રોડં નિરોધૈકાગ્રસિદ્ધયે ॥ ૧૮-૪૫॥

નિર્વાસનં હરિં દૃષ્ટ્વા તૂષ્ણીં વિષયદન્તિનઃ ।
પલાયન્તે ન શક્તાસ્તે સેવન્તે કૃતચાટવઃ ॥ ૧૮-૪૬॥

ન મુક્તિકારિકાં ધત્તે નિઃશઙ્કો યુક્તમાનસઃ ।
પશ્યન્ શ‍ૃણ્વન્ સ્પૃશન્ જિઘ્રન્નશ્નન્નાસ્તે યથાસુખમ્ ॥ ૧૮-૪૭॥

વસ્તુશ્રવણમાત્રેણ શુદ્ધબુદ્ધિર્નિરાકુલઃ ।
નૈવાચારમનાચારમૌદાસ્યં વા પ્રપશ્યતિ ॥ ૧૮-૪૮॥

યદા યત્કર્તુમાયાતિ તદા તત્કુરુતે ઋજુઃ ।
શુભં વાપ્યશુભં વાપિ તસ્ય ચેષ્ટા હિ બાલવત્ ॥ ૧૮-૪૯॥

સ્વાતન્ત્ર્યાત્સુખમાપ્નોતિ સ્વાતન્ત્ર્યાલ્લભતે પરમ્ ।
સ્વાતન્ત્ર્યાન્નિર્વૃતિં ગચ્છેત્સ્વાતન્ત્ર્યાત્ પરમં પદમ્ ॥ ૧૮-૫૦॥

અકર્તૃત્વમભોક્તૃત્વં સ્વાત્મનો મન્યતે યદા ।
તદા ક્ષીણા ભવન્ત્યેવ સમસ્તાશ્ચિત્તવૃત્તયઃ ॥ ૧૮-૫૧॥

ઉચ્છૃઙ્ખલાપ્યકૃતિકા સ્થિતિર્ધીરસ્ય રાજતે ।
ન તુ સસ્પૃહચિત્તસ્ય શાન્તિર્મૂઢસ્ય કૃત્રિમા ॥ ૧૮-૫૨॥

વિલસન્તિ મહાભોગૈર્વિશન્તિ ગિરિગહ્વરાન્ ।
નિરસ્તકલ્પના ધીરા અબદ્ધા મુક્તબુદ્ધયઃ ॥ ૧૮-૫૩॥

શ્રોત્રિયં દેવતાં તીર્થમઙ્ગનાં ભૂપતિં પ્રિયમ્ ।
દૃષ્ટ્વા સમ્પૂજ્ય ધીરસ્ય ન કાપિ હૃદિ વાસના ॥ ૧૮-૫૪॥

ભૃત્યૈઃ પુત્રૈઃ કલત્રૈશ્ચ દૌહિત્રૈશ્ચાપિ ગોત્રજૈઃ ।
વિહસ્ય ધિક્કૃતો યોગી ન યાતિ વિકૃતિં મનાક્ ॥ ૧૮-૫૫॥

સન્તુષ્ટોઽપિ ન સન્તુષ્ટઃ ખિન્નોઽપિ ન ચ ખિદ્યતે ।
તસ્યાશ્ચર્યદશાં તાં તાં તાદૃશા એવ જાનતે ॥ ૧૮-૫૬॥

કર્તવ્યતૈવ સંસારો ન તાં પશ્યન્તિ સૂરયઃ ।
શૂન્યાકારા નિરાકારા નિર્વિકારા નિરામયાઃ ॥ ૧૮-૫૭॥

અકુર્વન્નપિ સઙ્ક્ષોભાદ્ વ્યગ્રઃ સર્વત્ર મૂઢધીઃ ।
કુર્વન્નપિ તુ કૃત્યાનિ કુશલો હિ નિરાકુલઃ ॥ ૧૮-૫૮॥

સુખમાસ્તે સુખં શેતે સુખમાયાતિ યાતિ ચ ।
સુખં વક્તિ સુખં ભુઙ્ક્તે વ્યવહારેઽપિ શાન્તધીઃ ॥ ૧૮-૫૯॥

સ્વભાવાદ્યસ્ય નૈવાર્તિર્લોકવદ્ વ્યવહારિણઃ ।
મહાહ્રદ ઇવાક્ષોભ્યો ગતક્લેશઃ સુશોભતે ॥ ૧૮-૬૦॥

નિવૃત્તિરપિ મૂઢસ્ય પ્રવૃત્તિ રુપજાયતે ।
પ્રવૃત્તિરપિ ધીરસ્ય નિવૃત્તિફલભાગિની ॥ ૧૮-૬૧॥

પરિગ્રહેષુ વૈરાગ્યં પ્રાયો મૂઢસ્ય દૃશ્યતે ।
દેહે વિગલિતાશસ્ય ક્વ રાગઃ ક્વ વિરાગતા ॥ ૧૮-૬૨॥

ભાવનાભાવનાસક્તા દૃષ્ટિર્મૂઢસ્ય સર્વદા ।
ભાવ્યભાવનયા સા તુ સ્વસ્થસ્યાદૃષ્ટિરૂપિણી ॥ ૧૮-૬૩॥

સર્વારમ્ભેષુ નિષ્કામો યશ્ચરેદ્ બાલવન્ મુનિઃ ।
ન લેપસ્તસ્ય શુદ્ધસ્ય ક્રિયમાણેઽપિ કર્મણિ ॥ ૧૮-૬૪॥

સ એવ ધન્ય આત્મજ્ઞઃ સર્વભાવેષુ યઃ સમઃ ।
પશ્યન્ શ‍ૃણ્વન્ સ્પૃશન્ જિઘ્રન્ન્ અશ્નન્નિસ્તર્ષમાનસઃ ॥ ૧૮-૬૫॥

ક્વ સંસારઃ ક્વ ચાભાસઃ ક્વ સાધ્યં ક્વ ચ સાધનમ્ ।
આકાશસ્યેવ ધીરસ્ય નિર્વિકલ્પસ્ય સર્વદા ॥ ૧૮-૬૬॥

સ જયત્યર્થસંન્યાસી પૂર્ણસ્વરસવિગ્રહઃ ।
અકૃત્રિમોઽનવચ્છિન્ને સમાધિર્યસ્ય વર્તતે ॥ ૧૮-૬૭॥

બહુનાત્ર કિમુક્તેન જ્ઞાતતત્ત્વો મહાશયઃ ।
ભોગમોક્ષનિરાકાઙ્ક્ષી સદા સર્વત્ર નીરસઃ ॥ ૧૮-૬૮॥

મહદાદિ જગદ્દ્વૈતં નામમાત્રવિજૃમ્ભિતમ્ ।
વિહાય શુદ્ધબોધસ્ય કિં કૃત્યમવશિષ્યતે ॥ ૧૮-૬૯॥

ભ્રમભૂતમિદં સર્વં કિઞ્ચિન્નાસ્તીતિ નિશ્ચયી ।
અલક્ષ્યસ્ફુરણઃ શુદ્ધઃ સ્વભાવેનૈવ શામ્યતિ ॥ ૧૮-૭૦॥

શુદ્ધસ્ફુરણરૂપસ્ય દૃશ્યભાવમપશ્યતઃ ।
ક્વ વિધિઃ ક્વ ચ વૈરાગ્યં ક્વ ત્યાગઃ ક્વ શમોઽપિ વા ॥ ૧૮-૭૧॥

સ્ફુરતોઽનન્તરૂપેણ પ્રકૃતિં ચ ન પશ્યતઃ ।
ક્વ બન્ધઃ ક્વ ચ વા મોક્ષઃ ક્વ હર્ષઃ ક્વ વિષાદિતા ॥ ૧૮-૭૨॥

બુદ્ધિપર્યન્તસંસારે માયામાત્રં વિવર્તતે ।
નિર્મમો નિરહઙ્કારો નિષ્કામઃ શોભતે બુધઃ ॥ ૧૮-૭૩॥

અક્ષયં ગતસન્તાપમાત્માનં પશ્યતો મુનેઃ ।
ક્વ વિદ્યા ચ ક્વ વા વિશ્વં ક્વ દેહોઽહં મમેતિ વા ॥ ૧૮-૭૪॥

નિરોધાદીનિ કર્માણિ જહાતિ જડધીર્યદિ ।
મનોરથાન્ પ્રલાપાંશ્ચ કર્તુમાપ્નોત્યતત્ક્ષણાત્ ॥ ૧૮-૭૫॥

મન્દઃ શ્રુત્વાપિ તદ્વસ્તુ ન જહાતિ વિમૂઢતામ્ ।

નિર્વિકલ્પો બહિર્યત્નાદન્તર્વિષયલાલસઃ ॥ ૧૮-૭૬॥

જ્ઞાનાદ્ ગલિતકર્મા યો લોકદૃષ્ટ્યાપિ કર્મકૃત્ ।
નાપ્નોત્યવસરં કર્તું વક્તુમેવ ન કિઞ્ચન ॥ ૧૮-૭૭॥

ક્વ તમઃ ક્વ પ્રકાશો વા હાનં ક્વ ચ ન કિઞ્ચન ।
નિર્વિકારસ્ય ધીરસ્ય નિરાતઙ્કસ્ય સર્વદા ॥ ૧૮-૭૮॥

ક્વ ધૈર્યં ક્વ વિવેકિત્વં ક્વ નિરાતઙ્કતાપિ વા ।
અનિર્વાચ્યસ્વભાવસ્ય નિઃસ્વભાવસ્ય યોગિનઃ ॥ ૧૮-૭૯॥

ન સ્વર્ગો નૈવ નરકો જીવન્મુક્તિર્ન ચૈવ હિ ।
બહુનાત્ર કિમુક્તેન યોગદૃષ્ટ્યા ન કિઞ્ચન ॥ ૧૮-૮૦॥

નૈવ પ્રાર્થયતે લાભં નાલાભેનાનુશોચતિ ।
ધીરસ્ય શીતલં ચિત્તમમૃતેનૈવ પૂરિતમ્ ॥ ૧૮-૮૧॥

ન શાન્તં સ્તૌતિ નિષ્કામો ન દુષ્ટમપિ નિન્દતિ ।
સમદુઃખસુખસ્તૃપ્તઃ કિઞ્ચિત્ કૃત્યં ન પશ્યતિ ॥ ૧૮-૮૨॥

ધીરો ન દ્વેષ્ટિ સંસારમાત્માનં ન દિદૃક્ષતિ ।
હર્ષામર્ષવિનિર્મુક્તો ન મૃતો ન ચ જીવતિ ॥ ૧૮-૮૩॥

નિઃસ્નેહઃ પુત્રદારાદૌ નિષ્કામો વિષયેષુ ચ ।
નિશ્ચિન્તઃ સ્વશરીરેઽપિ નિરાશઃ શોભતે બુધઃ ॥ ૧૮-૮૪॥

તુષ્ટિઃ સર્વત્ર ધીરસ્ય યથાપતિતવર્તિનઃ ।
સ્વચ્છન્દં ચરતો દેશાન્ યત્રસ્તમિતશાયિનઃ ॥ ૧૮-૮૫॥

પતતૂદેતુ વા દેહો નાસ્ય ચિન્તા મહાત્મનઃ ।
સ્વભાવભૂમિવિશ્રાન્તિવિસ્મૃતાશેષસંસૃતેઃ ॥ ૧૮-૮૬॥

અકિઞ્ચનઃ કામચારો નિર્દ્વન્દ્વશ્છિન્નસંશયઃ ।
અસક્તઃ સર્વભાવેષુ કેવલો રમતે બુધઃ ॥ ૧૮-૮૭॥

નિર્મમઃ શોભતે ધીરઃ સમલોષ્ટાશ્મકાઞ્ચનઃ ।
સુભિન્નહૃદયગ્રન્થિર્વિનિર્ધૂતરજસ્તમઃ ॥ ૧૮-૮૮॥

સર્વત્રાનવધાનસ્ય ન કિઞ્ચિદ્ વાસના હૃદિ ।
મુક્તાત્મનો વિતૃપ્તસ્ય તુલના કેન જાયતે ॥ ૧૮-૮૯॥

જાનન્નપિ ન જાનાતિ પશ્યન્નપિ ન પશ્યતિ ।
બ્રુવન્ અપિ ન ચ બ્રૂતે કોऽન્યો નિર્વાસનાદૃતે ॥ ૧૮-૯૦॥

ભિક્ષુર્વા ભૂપતિર્વાપિ યો નિષ્કામઃ સ શોભતે ।
ભાવેષુ ગલિતા યસ્ય શોભનાશોભના મતિઃ ॥ ૧૮-૯૧॥

ક્વ સ્વાચ્છન્દ્યં ક્વ સઙ્કોચઃ ક્વ વા તત્ત્વવિનિશ્ચયઃ ।
નિર્વ્યાજાર્જવભૂતસ્ય ચરિતાર્થસ્ય યોગિનઃ ॥ ૧૮-૯૨॥

આત્મવિશ્રાન્તિતૃપ્તેન નિરાશેન ગતાર્તિના ।
અન્તર્યદનુભૂયેત તત્ કથં કસ્ય કથ્યતે ॥ ૧૮-૯૩॥

સુપ્તોऽપિ ન સુષુપ્તૌ ચ સ્વપ્નેऽપિ શયિતો ન ચ ।
જાગરેऽપિ ન જાગર્તિ ધીરસ્તૃપ્તઃ પદે પદે ॥ ૧૮-૯૪॥

જ્ઞઃ સચિન્તોऽપિ નિશ્ચિન્તઃ સેન્દ્રિયોऽપિ નિરિન્દ્રિયઃ ।
સુબુદ્ધિરપિ નિર્બુદ્ધિઃ સાહઙ્કારોऽનહઙ્કૃતિઃ ॥ ૧૮-૯૫॥

ન સુખી ન ચ વા દુઃખી ન વિરક્તો ન સઙ્ગવાન્ ।
ન મુમુક્ષુર્ન વા મુક્તા ન કિઞ્ચિન્ન ચ કિઞ્ચન ॥ ૧૮-૯૬॥

વિક્ષેપેऽપિ ન વિક્ષિપ્તઃ સમાધૌ ન સમાધિમાન્ ।
જાડ્યેऽપિ ન જડો ધન્યઃ પાણ્ડિત્યેऽપિ ન પણ્ડિતઃ ॥ ૧૮-૯૭॥

મુક્તો યથાસ્થિતિસ્વસ્થઃ કૃતકર્તવ્યનિર્વૃતઃ ।
સમઃ સર્વત્ર વૈતૃષ્ણ્યાન્ન સ્મરત્યકૃતં કૃતમ્ ॥ ૧૮-૯૮॥

ન પ્રીયતે વન્દ્યમાનો નિન્દ્યમાનો ન કુપ્યતિ ।
નૈવોદ્વિજતિ મરણે જીવને નાભિનન્દતિ ॥ ૧૮-૯૯॥

ન ધાવતિ જનાકીર્ણં નારણ્યમુપશાન્તધીઃ ।
યથાતથા યત્રતત્ર સમ એવાવતિષ્ઠતે ॥ ૧૮-૧૦૦॥

## ૧૯

જનક ઉવાચ ॥

તત્ત્વવિજ્ઞાનસન્દંશમાદાય હૃદયોદરાત્ ।
નાનાવિધપરામર્શશલ્યોદ્ધારઃ કૃતો મયા ॥ ૧૯-૧॥

ક્વ ધર્મઃ ક્વ ચ વા કામઃ ક્વ ચાર્થઃ ક્વ વિવેકિતા ।
ક્વ દ્વૈતં ક્વ ચ વાઽદ્વૈતં સ્વમહિમ્નિ સ્થિતસ્ય મે ॥ ૧૯-૨॥

ક્વ ભૂતં ક્વ ભવિષ્યદ્ વા વર્તમાનમપિ ક્વ વા ।
ક્વ દેશઃ ક્વ ચ વા નિત્યં સ્વમહિમ્નિ સ્થિતસ્ય મે ॥ ૧૯-૩॥

ક્વ ચાત્મા ક્વ ચ વાનાત્મા ક્વ શુભં ક્વાશુભં યથા ।
ક્વ ચિન્તા ક્વ ચ વાચિન્તા સ્વમહિમ્નિ સ્થિતસ્ય મે ॥ ૧૯-૪॥

ક્વ સ્વપ્નઃ ક્વ સુષુપ્તિર્વા ક્વ ચ જાગરણં તથા ।
ક્વ તુરીયં ભયં વાપિ સ્વમહિમ્નિ સ્થિતસ્ય મે ॥ ૧૯-૫॥

ક્વ દૂરં ક્વ સમીપં વા બાહ્યં ક્વાભ્યન્તરં ક્વ વા ।
ક્વ સ્થૂલં ક્વ ચ વા સૂક્ષ્મં સ્વમહિમ્નિ સ્થિતસ્ય મે ॥ ૧૯-૬॥

ક્વ મૃત્યુર્જીવિતં વા ક્વ લોકાઃ ક્વાસ્ય ક્વ લૌકિકમ્ ।
ક્વ લયઃ ક્વ સમાધિર્વા સ્વમહિમ્નિ સ્થિતસ્ય મે ॥ ૧૯-૭॥

અલં ત્રિવર્ગકથયા યોગસ્ય કથયાપ્યલમ્ ।
અલં વિજ્ઞાનકથયા વિશ્રાન્તસ્ય મમાત્મનિ ॥ ૧૯-૮॥

## ૨૦

જનક ઉવાચ ॥

ક્વ ભૂતાનિ ક્વ દેહો વા ક્વેન્દ્રિયાણિ ક્વ વા મનઃ ।
ક્વ શૂન્યં ક્વ ચ નૈરાશ્યં મત્સ્વરૂપે નિરઞ્જને ॥ ૨૦-૧॥

ક્વ શાસ્ત્રં ક્વાત્મવિજ્ઞાનં ક્વ વા નિર્વિષયં મનઃ ।
ક્વ તૃપ્તિઃ ક્વ વિતૃષ્ણાત્વં ગતદ્વન્દ્વસ્ય મે સદા ॥ ૨૦-૨॥

ક્વ વિદ્યા ક્વ ચ વાવિદ્યા ક્વાહં ક્વેદં મમ ક્વ વા ।
ક્વ બન્ધ ક્વ ચ વા મોક્ષઃ સ્વરૂપસ્ય ક્વ રૂપિતા ॥ ૨૦-૩॥

ક્વ પ્રારબ્ધાનિ કર્માણિ જીવન્મુક્તિરપિ ક્વ વા ।
ક્વ તદ્ વિદેહકૈવલ્યં નિર્વિશેષસ્ય સર્વદા ॥ ૨૦-૪॥

ક્વ કર્તા ક્વ ચ વા ભોક્તા નિષ્ક્રિયં સ્ફુરણં ક્વ વા ।
ક્વાપરોક્ષં ફલં વા ક્વ નિઃસ્વભાવસ્ય મે સદા ॥ ૨૦-૫॥

ક્વ લોકં ક્વ મુમુક્ષુર્વા ક્વ યોગી જ્ઞાનવાન્ ક્વ વા ।
ક્વ બદ્ધઃ ક્વ ચ વા મુક્તઃ સ્વસ્વરૂપેઽહમદ્વયે ॥ ૨૦-૬॥

ક્વ સૃષ્ટિઃ ક્વ ચ સંહારઃ ક્વ સાધ્યં ક્વ ચ સાધનમ્ ।
ક્વ સાધકઃ ક્વ સિદ્ધિર્વા સ્વસ્વરૂપેઽહમદ્વયે ॥ ૨૦-૭॥

ક્વ પ્રમાતા પ્રમાણં વા ક્વ પ્રમેયં ક્વ ચ પ્રમા ।
ક્વ કિઞ્ચિત્ ક્વ ન કિઞ્ચિદ્ વા સર્વદા વિમલસ્ય મે ॥ ૨૦-૮॥

ક્વ વિક્ષેપઃ ક્વ ચૈકાગ્ર્યં ક્વ નિર્બોધઃ ક્વ મૂઢતા ।
ક્વ હર્ષઃ ક્વ વિષાદો વા સર્વદા નિષ્ક્રિયસ્ય મે ॥ ૨૦-૯॥

ક્વ ચૈષ વ્યવહારો વા ક્વ ચ સા પરમાર્થતા ।
ક્વ સુખં ક્વ ચ વા દુખં નિર્વિમર્શસ્ય મે સદા ॥ ૨૦-૧૦॥

ક્વ માયા ક્વ ચ સંસારઃ ક્વ પ્રીતિર્વિરતિઃ ક્વ વા ।
ક્વ જીવઃ ક્વ ચ તદ્બ્રહ્મ સર્વદા વિમલસ્ય મે ॥ ૨૦-૧૧॥

ક્વ પ્રવૃત્તિર્નિર્વૃત્તિર્વા ક્વ મુક્તિઃ ક્વ ચ બન્ધનમ્ ।
કૂટસ્થનિર્વિભાગસ્ય સ્વસ્થસ્ય મમ સર્વદા ॥ ૨૦-૧૨॥

ક્વોપદેશઃ ક્વ વા શાસ્ત્રં ક્વ શિષ્યઃ ક્વ ચ વા ગુરુઃ ।
ક્વ ચાસ્તિ પુરુષાર્થો વા નિરુપાધેઃ શિવસ્ય મે ॥ ૨૦-૧૩॥

ક્વ ચાસ્તિ ક્વ ચ વા નાસ્તિ ક્વાસ્તિ ચૈકં ક્વ ચ દ્વયમ્ ।
બહુનાત્ર કિમુક્તેન કિઞ્ચિન્નોત્તિષ્ઠતે મમ ॥ ૨૦-૧૪॥

ઇતિ અષ્ટાવક્રગીતા સમાપ્તા ।
॥ ૐ તત્સત્ ॥

Encoded and proofread by John Richards
Proofread by Raj Acharya kingteacher at hotmail, Rajani Arjun Shankar

---

*aShTAvakra gItA*

pdf was typeset on November 5, 2024

Please send corrections to *sanskrit@cheerful.com*